6

म२:४२७

८५६

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐
ग्रंथ नाव श्रीरामायणे-बाल कांडे श्रीराम कवचं
लेखक लिखित पत्रे ५.

॥ इतिश्रीरामायणेबालकांडे ॥
॥ श्रीरामकवचंसंपूर्णं ॥ छ ॥

८५६

॥१॥

श्री

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ पार्वत्यु
वाच ॥ भगवन्सर्वदेवेशसर्वदेवनमस्कृत ॥ सर्वंच
कथितंदेवराममंत्रंविशेषतः ॥१॥ त्रैलोक्यमोह
ननामकवचंपूर्वसूचितं ॥ कथयस्वमहादेवय
द्यहंतववल्लभा ॥२॥ ईश्वरउवाच ॥ शृणुवक्ष्या
मिदेवेशिकवचंपरमाद्भुतं ॥ अत्यंतगोपनंगु
ह्यंब्रह्ममंत्रौघविग्रहं ॥३॥ ॐ अस्यश्रीरामक ॥१॥

वचस्य॥ब्रह्मऋषिः॥गायत्रीछंदः॥श्रीराम
चंद्रोदेवता॥ममचतुर्वर्गसाधनेजपेविनियो
गः॥प्रणवोमेशिरःपातुतारकब्रह्मरूपकः॥अ
नंतोग्न्यासिनःस्कंदुर्नासामेकाक्षरोवतु॥१॥रां
रामायनमइतिषडार्णोभुक्तिमुक्तिदः॥भालंपा
यान्नेत्रयुग्मंरामोद्व्यक्षरसंज्ञकः॥२॥क्लींपायाच्छ्रो
त्रयुग्मंचैकाक्षरःसर्वमोहनः॥क्लींरामायनमइ

तिमुखंमेपरिरक्षतु ॥३॥ रांरामचंद्रायस्वाहा ए
वर्णोमेभुजद्वयं ॥ श्रींश्रीरामायनमइतिस्कंधोपा
तुखरांतकः ॥४॥ श्रीरामचंद्रायरक्षोघ्नायनमइति
द्वादशाक्षरः ॥ हृदयंमेसदापातुरघुवंशसमुद्भवः ॥
५॥ ह्रींरामचंद्रायनमइतिपातुमेउरुयुग्मकं ॥ श्री
रामभद्रायस्वाहानाभिमष्टाक्षरोवतु ॥६॥ श्रीरा
मभद्रायसीतायाःपतयेद्विठंतकः ॥ सचिंत्यनीस

ततंपातुराक्षसेंद्रविमर्दकः॥७॥प्रणवोरामचंद्राय
हृदंताक्षाक्षरोवतु॥जानुनीमेसदापातुरक्षःकुल
विनाशकः॥८॥प्रणवोराममद्रायह्विंतोक्षाक्ष
रोवतु॥पादयुग्मंसदापातुवानरेंद्रस्त्रियःप्रदः॥
९॥ह्रींसीतापतयेनमइतिप्राच्यांमांसर्वदावतु॥
हुंजानकीवल्लभायेतिपातुयाम्यांसदाप्रभुः॥१०॥
क्लींजानकीनाथायेतिप्रतीच्यांमांसदावतु॥श्री

॥३॥

रघुनाथायनमः कौबेरीदिशिरक्षतु ॥११॥ नमोभग
वतेब्रूयाच्चतुर्थ्यंरघुनंदनं ॥ रक्षोघ्नोविदिशाःपातुम
धुरादिशमीरयेत् ॥१२॥ प्रसन्नवदनायेतिपश्चादमि
ततेजसे ॥ वाल्मायपश्चाद्भद्रायविक्रमवेतदनंतरं ॥१३॥
तो प्रणवादिनमोयंमात्नामंत्रमुदीरितः ॥ राजस्थानेस
दापातुरघुवंशसमुद्भवः ॥१४॥ इतितेकथितंदेवि सर्व
मंत्रौघविग्रहं ॥ त्रैलोक्यमोहनंनामकवचंब्रह्म ॥२॥

पठे

रूपकं॥१५॥प्रातःकालेंघस्तुसोभिष्टफलमाप्नुया
त्॥पूजाकालेपठेद्यस्तुकवचंसाधकोत्तम॥१६॥की
र्त्तिःश्रीःकांतिमेधायुर्वांछितंभवतिध्रुवं॥राममंत्रम
यंब्रह्मकवचंमन्मुखोदितं॥१७॥गुरुमभ्यर्च्यविधिव
त्कवचंहिपठेत्ततः॥द्धिःसरद्धायथान्यायंसो
पिपुण्यवतांनरः॥१८॥देवमभ्यर्च्यविधिवत्पुरश्च
र्यांसमाचरेत्॥अष्टोत्तरशतंजप्त्वादशांशंहव

नादिकं॥१९॥नतस्त्कसिद्धिकवचंसर्वकार्यार्थसा
धकं॥मंत्रसिद्धिर्भवेतस्यपुरश्चर्याविधानतः॥२०॥
गद्यपद्यमयीवाणीतस्यवक्त्रात्प्रवर्त्तते॥वक्त्रेतस्य
वसेद्ब्राह्मीकमलानिश्चलागृहे॥२१॥पुष्पांजल्या
ष्टकंदत्वामूलेनैवपठेत्सकृत्॥अपिवर्षसहस्रा
णांपूजायाफलमाप्नुयात्॥२२॥विलिख्यभूर्जपत्रे
तुस्वर्णस्थंधारयेद्यदि॥कंठेवादक्षिणेबाहुसकुर्या

हासवधमं॥२३॥त्रैलोक्यंक्षोभयेत्येवत्रैलोक्यवि
जयीभवेत्॥तद्गात्रंप्राप्यशस्त्राणिब्रह्मास्त्रा
धानियानिच॥२४॥माल्यानिकुसुमानीवसुखदा
निभवंतिहि॥स्पर्द्धमुद्धूयभवनेलक्ष्मीवाणीसु
खंवसेत्॥२५॥इदंकवचमज्ञात्वायोजपेद्रामम
त्रकं॥शतलक्षप्रजप्तोपिनमंत्रःसिद्धिदायकः॥ तु २६॥
२६॥सशास्त्रघातमाप्नोतिसोचिरान्मृत्युमाप्नुयो

॥ इतिश्रीब्रह्मयामलेश्रीमहादेवपार्वती॥
॥संवादेश्रीरामकवचंसंपूर्णं॥ छ ॥ छ ॥